Reg. No. | | | | | | | | | |

# BBASKLN 201

## Second Semester B.B.A. Degree Examination, September 2022
## (NEP 2020) (2021-22 Batch Onwards)
## LANGUAGE – SAMSKRITAM (AECC)

Time : 2 Hours Max. Marks : 60

***सूचना*** *: 1)* ***संस्कृत****भाषया* ***कर्णाटक****भाषया वा उत्तराणि लिखत ।*

*2) प्रश्नसंख्या* ***IV, V*** *अनयो: संस्कृतभाषया* ***एव*** *उत्तराणि लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत । **(1×5=5)**

1) संकर्षणस्तु भीमकृतं दुर्योधनस्य शिरसि पदाक्रमणमक्षम्यन्, आः पाप, दुर्विनीत ! कथं धर्मेण युध्यमानं महाराजं कुरुराजमधर्मेण निपात्य, ममाग्र एव पदा तन्मूर्धानं स्पृशसि ? अरे मदध्मात ! कस्माद्गुरोरधीतवानसि द्वन्द्वे कटेरधः प्रहर्तुम् ? रे रे दुरात्मन् ! कथं मूर्धावसिक्तस्य शिर: पदा स्पृशन्न जुगुप्ससे ? अय्यवलिप्तता! मत्समो वीरो नास्तीति दृप्तं त्वां मदान्धं गजं कण्ठीरव इवाद्यैव निर्भिन्नमस्तकं निर्भिद्य महाराजदुर्योधनमाश्वासयामि इति साटोपं वेपमानतनुरुत्तस्थौ ।

2) एवं तौ विवदमानौ धर्माधिकारिणं गत्वा सकलं वृत्तं न्यवेदयताम् । अथ धर्माधिकारेणाधिष्ठितपुरुषैर्यावत्तौ दिव्यार्थं नियोजितौ तावत् पापबुद्धिराह – अहो न सम्यग्दृष्टो न्याय: । उक्तं च –

विवादेऽन्विष्यते पत्रं पत्राभावे तु साक्षिण: ।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिण: ।।

अत्र विषये वृक्षदेवता मम साक्षिभूता: सन्ति । तत्ता एवावयोरेकं चौरं साधुं वा सनिश्चयं घोषयन्तीति । अथ तै: सर्वैरभिहितम् – भो युक्तमुक्तं भवता । तदस्माकमप्यत्र विषये कौतूहलमस्ति । तत्प्रत्यूषसमये द्वाभ्यामस्माभि: सह वनोद्देशं गन्तव्यमिति ।

P.T.O.

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत । **(4×3=12)**

1) सत्यं वद । धर्मं चर ।
2) भगवति शरणागतिः मोक्षोपायः इति तन्मतम् ।
3) सम्प्रति एतेषां पापापनुत्तये मन्दाकिनीम् अत्रानय ।
4) विप्राचारो युधिष्ठिरः तवानिष्टं न वाञ्छति ।
5) न वित्तं दर्शयेत् प्राज्ञः ।
6) कंसस्य बन्दीपुत्र, जानामि ते कौटिल्यम् ।

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत । **(3×8=24)**

1) धर्मबुद्धिपापबुद्ध्योः कथां नीतिसहितं वर्णयत ।
2) 'किं किं न साधयति कल्पलतेव विद्या' इत्येनां सूक्तिं यथापाठ्यं विवृणुत ।
3) द्वैतसिद्धान्तप्रतिपादकं श्री मध्वाचार्यम् अधिकृत्य प्रबन्धं लिखत ।
4) पुत्रशोकसन्तप्तौ गान्धारीधृतराष्ट्रौ कृष्णेन कथम् उपसान्त्वितौ ?
5) द्रौपद्यपहरणप्रसङ्गे भीमपार्थयोः अरिनिग्रहवैखरिः – विषये पाठानुसारं प्रबन्धं विरचयत ।

IV. **एकं संस्कृतेन** टिप्पणीं लिखत । **(1×4=4)**

1) रामायणम् ।
2) भुक्कुण्डः ।
3) महाभारतम् ।

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत । **(15×1=15)**

अ) रेखाङ्कितपदस्य कारकं सूचयत ।

1) सः पापबुद्धिं अवदत् । (करणं, सम्प्रदानं, कर्म)
2) पाण्डवाः वनात् आगच्छन्ति । (कर्म, करणं, अपादानं)
3) धरणीपीठे तस्य जन्म निरर्थकम् । (अधिकरणं, अपादानं, कर्म)
4) भुक्कुण्डः नाम चोरः बभूव । (कर्म, करणं, कर्तृ)
5) भीमः गदया दुर्योधनस्य सक्थि बभञ्ज । (अपादानं, कर्तृ, करणं)

आ) वाक्यदोषान् परिहरत ।

1) सगरो नाम राजः आसीत् ।

2) वृक्षस्य कोटरे अध्यास्त ।

3) अहं शैलसुतां शिरसा धारयिष्यति ।

4) त्वं मन्दाकिनीम् अत्र आनयतु ।

5) भवान् विषं पिबसि ।

इ) सन्धिनाम लिखत ।

1) स्वस्ति + अस्तु = स्वस्त्यस्तु । (यण्सन्धिः, गुणसन्धिः, वृद्धिसन्धिः)

2) यथा + अभिमतम् = यथाभिमतम् । (सवर्णदीर्घसन्धिः, यण्सन्धिः, गुणसन्धिः)

3) वाक् + ईशः = वागीशः । (श्चुत्वसन्धिः, जश्त्वसन्धिः, सवर्णदीर्घसन्धिः)

4) शुभे + अहनि = शुभेऽहनि । (यण् सन्धिः, विसर्गसन्धिः, पूर्वरूपसन्धिः)

5) द्वौ + अपि = द्वावपि । (गुणसन्धिः, यान्तवान्तादेशसन्धिः, वृद्धिसन्धिः)

ई) समासनाम सूचयत ।

1) न पूर्वा–अपूर्वा । (नञ् तत्पुरुषः, द्विगुः, द्वन्द्वः)

2) पञ्चानां वटानां समाहारः – पञ्चवटी । (द्विगुः, कर्मधारयः, बहुव्रीहिः)

3) पूर्णा प्रज्ञा यस्य सः – पूर्णप्रज्ञः । (द्विगुः, द्वन्द्वः, बहुव्रीहिः)

4) परिवारेण सहितं–सपरिवारम् । (कर्मधारयः, अव्ययीभावः, द्विगुः)

5) भीष्मश्च द्रोणश्च कर्णश्च–भीष्मद्रोणकर्णाः । (अव्ययीभावः, द्वन्द्वः, द्विगुः)

---